**Vidhyayana - ISSN 2454-8596**
An International Multidisciplinary Peer-Reviewed E-Journal
www.j.vidhyayanaejournal.org
Indexed in: ROAD & Google Scholar

# पतञ्जलिमतानुसारं परिभाषाशब्दस्यार्थेऽन्येषां विदुषां परिभाषाशब्दस्यार्थसन्निवेशः ।

**राज्यगुरु जयेशकुमार आर.**

**अन्येषां विदुषां मतानुसारं परिभाषाशब्दार्थः**

न प्राप्यते पाणिनेरष्टाध्यायां 'परिभाषा' इत्याख्यः शब्दः । तथाऽपि दाक्षिपुत्रस्य व्याकरणशास्त्रे परिभाषासूत्राणामत्यधिकं महत्त्वं विद्यते । परिभाषासूत्रविषये काशिकायां वामनजयादित्याभ्यामुक्तं यत् -

**परिभाषेयं स्थानिनियमार्था । अनियमसङ्ग्रहे नियमो विधीयते ।** [1]

अस्य मतानुसारं परिभाषा स्थानौ कश्चन नियमं स्थापयति । परिभाषाणामीदृशं महत्त्वं समनुभवन् महाकाव्यग्रन्थे शिशुपालवधेऽपि कथितं यत् -

**परितः प्रमिताक्षराऽपि सर्वं विषयं व्याप्तवती गता प्रतिष्ठाम् ।**
**न खलु प्रतिहन्यते कुतश्चित् परिभाषेव गरीयसी यदाज्ञा ॥** [2]

अत्र महाकवेः माघस्य कथनानुसारं परिभाषायाः कथनं भगवत आज्ञा सदृशं विद्यते यस्याः प्रतिहननमेव न शक्यते । परिभाषाणां विषयेऽन्येषां विदुषां मता अपि व्याकरणशास्त्रे विद्यन्ते । यथा –

1. **परितः सर्वतो भाष्यन्तेऽर्था आभिरिति परिभाषाः ।**[3]
2. **पदार्थविवेचकाचार्याणां युक्तियुक्ता वाक् इति काव्यप्रकाशटीकायां चण्डीदासः।** [4]
3. **अप्रामाण्यज्ञानानास्कन्दितबोधोपयोगीबोधजनकत्वं परिभाषत्वम् ।** [5]
4. **परितो व्यापृतां भाषां परिभाषां प्रचक्षते ।** [6]

---

[1] **काशिका – रचयिता – वामनजयादित्यौ – 1.1.3.**
[2] **शिशुपालवधम् -–16.80**
[3] **कातन्त्रपरिभाषावृत्तिः – दुर्गसिंहः – (परिभाषासंग्रहः – अभ्यंकरः – पृ-49 )**
[4] **शब्दकल्पद्रुमः – भागः -3 पृ-52**
[5] **परिभाषेन्दुशेखरस्य टीका – जयदेवमिश्रः – विजया टीका – पृ- 4 )**
[6] **परिभाषेन्दुशेखरस्य गदा टीकायाम् – वैद्यनाथपायगुण्डे – पृ-2**

**परिभाषाशब्दस्यार्थः पतञ्जलिसम्मतः -**

परिभाषाविषये सर्वोत्कृष्टं विधानं महाविदुषा पतञ्जलिना स्वस्य महाभाष्याख्ये ग्रन्थे लिखितं यत् -

**परिभाषा नाम त्रिप्रकारः । कश्चिदेकदेशस्थः सर्वं शास्त्रमभिज्वलयति यथा वेश्म प्रदीप इति ।**[7]

पतञ्जलेः मतानुसारं परिभाषासूत्राणि यान्यष्टाध्यायां दृश्यन्ते तानि खलु वेश्म प्रदीप इव स्थापितनियमानां साधयित्र्यः भवन्ति । यथा वेश्मप्रदीपः सर्वदा गृहान्तर्भागे बहिर्भागे च प्रकाशं प्रेषयति तथैव परिभाषा अपि सर्वदा पाणिनेः व्याकरणशास्त्रं तदनन्तरं ये कात्यायनपतञ्जलिभ्यां विरचिताः नियमाः सन्ति तान् नियमान् अपि प्रकाशयन्ति ।

यथा वेश्मप्रदीपः स्वस्य प्रकाशप्रभावात् गृहस्यानिष्टनिवारणं करोति तथा परिभाषा अपि स्वनियमप्रकाशात् व्याकरणशास्त्रस्य दोषान् दूरीकर्तुं समर्था भवन्ति । एकदेशस्थ इति शब्दप्रयोगस्याशयः स्वस्थानं न परित्यज्येति । सर्वं शास्त्रमिति कथनाच्च ज्ञायते यत्र केवलं व्याकरणशास्त्रमेवाऽपि त्वन्यानि शास्त्राण्यपि परिभाषाप्रभावात् प्रकाशदायकानि भवन्ति । प्रदीपः यथान्धकारं दूरीकृत्य प्रकाशं तनोति तथा परिभाषाः व्याकरणशास्त्राज्ञानान्धकारं दूरीकृत्य शब्दज्ञानं तनोति ।

पतञ्जलेः कथनेन ज्ञायते यत्- व्याकरणशास्त्रे खलु प्रधानानि विधिसूत्राणि भवन्ति वेश्मवत् किन्तु तत्र दीपक इव परिभाषासूत्राणि । यथा दीपेन विना गृहवासः न शक्यते तथैव परिभाषाभिः विना व्याकरणेऽत्र निवास एव न शक्यते । अन्योऽप्यस्यार्थः सम्भवति यथा- एकदेशस्थः दीपः गृहं ज्वलयति तथा परिभाषा अपि एकदेशस्था एव सम्पूर्णं व्याकरणशास्त्रं

---

[7] **महाभाष्यम् -–.1.49**

Vidhyayana - ISSN 2454-8596
An International Multidisciplinary Peer-Reviewed E-Journal
www.j.vidhyayanaejournal.org
Indexed in: ROAD & Google Scholar

ज्वलयतीति नागेशः – यथोद्देशं संज्ञापरिभाषम् कार्यकालं संज्ञापरिभाषम् इत्यनयोः व्याख्यानावसरे परिभाषेन्दुशेखरे प्रमाणी-करोति ।

**महाभाष्यानुसारमेवान्येषां विदुषां परिभाषाशब्दस्यार्थसन्निवेशः ।**

वामनजयादित्यमतानुसारमनियमे नियमविधायकानि परिभाषासूत्राणि । ताः परिभाषाः स्थानिनियमार्था इति ।अस्य कथनस्याशयः पतञ्जलेः 'एकदेशस्थ' इत्यनेन शब्देन विधीयते । अनियमप्रसङ्गे यथा नियमस्थापनं भवति काशिकाकर्त्रोः मतानुसारं तथा यथा-एकदेशस्थः दीपः गृहे प्रकाशप्रभावात् ग्रहणाग्रहणनियमस्थापकः । दुर्गसिंहस्य च 'परितः सर्वतः' इत्यस्याः व्याख्यायाः – एकदेशस्थे दीपे च समावेशः । चण्डीदासस्य मतानुसारं पदार्थविवेचकाचार्याणां युक्तियुक्ता वागिति परिभाषा । पतञ्जलेः सर्वं शास्त्रमभिज्वलयतीति शब्दे युक्तियुक्ता वागिति समाविष्टः भावः । सर्वेषां शास्त्राणामभिज्वलनं खलु युक्तियुक्तया वाचा-एव शक्यते । अयुक्तविधानेन शास्त्राभिज्वलनमेव न कदापि शक्यते ।

शिशुपालवधकर्तुः मतानुसारं परिभाषाणां प्रतिहननं न शक्यते भगवदाज्ञाया इव । भगवदाज्ञा एव शास्त्रम् । भगवदाज्ञाविरुद्धं शास्त्रमशास्त्रं भवति । पतञ्जलिना शास्त्राभिज्वलन-शब्दस्योल्लेखः कृतः । अतः शास्त्राभिज्वलनं भगवदाज्ञया परिभाषाभिश्च । तस्मात् शिशुपालवधकर्तुः मतः पतञ्जलिमते लीयते ।

यस्मिन् ज्ञाने प्रमाणं न शक्यते तत्र बोधं प्रमाणं वा स्थापयन्ति परिभाषाः इति विचारः जयदेवमिश्रस्य । पतञ्जलेः शास्त्राभिज्वलनमपि प्रमाणस्थापनादेव । यदि प्रमाणमेव न स्यात्तर्हि शास्त्राणां कोऽर्थः । शास्त्राभिज्वलनेन प्रमाणग्रहणाल्लीयते जयदेवमिश्रस्य मतः पतञ्जलावेव ।

वैद्यनाथपायगुण्डे महानुभावानां मतानुसारं या भाषा परितो व्यापृता सा परिभाषेति कथ्यते । परितः व्यापृतश्च दीपः स्वप्रकाशादिति पतञ्जलिविचारः । अस्मादेव कारणात् पतञ्जलेः मते पायगुण्डेमहानुभावानां मतोऽपि लीयते ।

Vidhyayana - ISSN 2454-8596
An International Multidisciplinary Peer-Reviewed E-Journal
www.j.vidhyayanaejournal.org
Indexed in: ROAD & Google Scholar

उपरि ये विचाराः प्रदत्ताः ते खलु दिशासूचकाः व्याकरणशास्त्रे परिभाषाशब्दार्थविषये भगवतः पतञ्जलेः कीदृशः विशालः विचार इति स्थापयितुं प्रयासः । भगवता पतञ्जलिना या व्याख्या परिभाषाविषये प्रदत्ता तस्मिन्नेवान्येषामाचार्याणां विचाराः निलीयन्ते यदि सम्यक्तया पतञ्जलिव्याख्या ज्ञाता चेत् । अस्मादेव कारणात् व्याख्यानविषये सर्वोत्कृष्टमिदं विधानं सर्वशास्त्रोपकारकं विद्यते व्याकरणशास्त्रे यत्-

**व्याख्यानतो विशेषप्रतिपत्तिर्नहि सन्देहादलक्षणम् ।**[8]

**...............इति शम् ................**

[8] **परिभाषेन्दुशेखरः -1**